प्रथमः पाठः

वन्दना

(नमः तथा नमामि के प्रयोग)

प्रस्तुत पाठ में संसार के सृष्टिकर्ता परमात्मा की वन्दना विभिन्न पौराणिक श्लोकों में की गयी है। ज्ञान का आरंभ रम प्रभु की स्तुति से ही हो यह इस पाठ का लक्ष्य है। परमात्मा जगत् के सभी कार्यों के संचालक तथा बिना माँगे ब-कुछ देने वाले हैं। इसलिए सबका कर्तव्य है कि उनकी वन्दना गान सहित करें।



नमस्ते विश्वरूपाय प्राणिनां पालकाय ते।
जन्म-स्थिति-विनाशाय विश्ववन्द्याय बन्धवे ॥1॥

प्रसादे यस्य सम्पत्तिः विपत्तिः कोपने तथा।
नमस्तस्मै विशालाय शिवाय परमात्मने ॥2॥

ज्ञानं धनं सुखं सत्यं तपो दानमयाचितम्।
प्रसादे यस्य लभते मानवस्तं नमाम्यहम् ॥3॥

नमामि देवं जगदीशरूपं स्मरामि रम्यं च जगत्स्वरूपम्।
वदामि तद्-वाचक-शब्दवृन्दं महेश्वरं देवगणैरगम्यम् ॥4॥

शब्दार्थः

नमस्ते (नमः + ते)	-	नमस्कार
विश्वरूपाय	=	विश्वरूप (समस्त संसार ही जिसका रूप है वैसा)के लिए
प्राणिनाम्	=	प्राणियों के / की
पालकाय	=	पालन करने वाले के लिए
ते (तुभ्यम्)	=	आपके लिए
जन्म-स्थिति-विनाशाय	=	रचना, विद्यमानता तथा नाश के लिए
विश्ववन्द्याय	=	संसार के द्वारा वन्दनीय के लिए
बन्धवे	=	मित्र / संबंधी के लिए
प्रसादे	=	कृपा होने पर
यस्य	=	जिसका
सम्पत्तिः	=	धन
विपत्तिः	=	संकट
कोपने	=	क्रोध करने पर / में
तथा	=	और, उस प्रकार से
नमस्तस्मै (नमः+तस्मै)	=	उसको / उनको नमस्कार है
विशालाय	=	बड़े / विशाल को / के लिए
शिवाय	=	शिव के लिए/ मङ्गल के लिए
परमात्मने	=	परमात्मा के लिए

ानम् = ज्ञान, जानकारी

त्यम् = सत्य, सच

पः = तपस्या

ानम् = दान

ाचितम् = न माँगा गया, बिना माँगे

ाप्ते = प्राप्त करता है

ानवस्तम् (मानवः+तम्) = मानव / मनुष्य, (तम्-) उसको

ाम्यहम् (नमामि+अहम्) = नमस्कार करता हूँ, (अहम्-) मैं

ामि = नमस्कार करता हूँ

वम् = देवता को

गदीशरूपम् (जगत्+ईशरूपम्) = संसार के स्वामी रूप वाले (को)

मरामि = याद / स्मरण करता हूँ

म्यम् सुन्दर जगत्स्वरूपम् = जगत् (की रचना) के रूप वाले

ादामि = कहता / बोलता हूँ

द् वाचक-शब्दवृन्दम् = उस (देव) के बोधक शब्दसमूह को

हेश्वरम् = महान् ईश्वर को

वगणैरगम्यम् (देवगणैः+अगम्यम्) = देवसमूहों के द्वारा न प्राप्त करने योग्य

व्याकरणम्

सन्धि-विच्छेदः

ामस्ते = नमः + ते (विसर्गसन्धिः)

ामस्तस्मै = नमः + तस्मै (विसर्गसन्धिः)

मानवस्तम् - मानवः + तम् (विसर्गसन्धिः)

नमाम्यहम् = नमामि + अहम् (यण्सन्धिः)

जगदीशः - जगत् + ईशः (व्यञ्जनसन्धिः)

देवगणैरगम्यम् = देवगणैः + अगम्यम् (विसर्गसन्धिः)

प्रकृति-प्रत्यय-विभागः

लभते - $\sqrt{\text{लभ्}}$, लट्लकारः, प्रथमपुरुषः, एकवचनम्

नमामि = $\sqrt{\text{नम्}}$, लट्लकारः, उत्तमपुरुषः, एकवचनम्

स्मरामि = $\sqrt{\text{स्मृ}}$, लट्लकारः, उत्तमपुरुषः, एकवचनम्

वदामि = $\sqrt{\text{वद्}}$, लट्लकारः, उत्तमपुरुषः, एकवचनम्

अगम्यम् = नञ् + $\sqrt{\text{गम्}}$ + यत्, नपुं, एकवचनम्

अभ्यासः

मौखिकः

1. उच्चैः वदत -

(क)	नमामि	नमावः	नमामः
	वदामि	वदावः	वदामः
	स्मरामि	स्मरावः	स्मरामः
(ख)	पालकाय	पालकाभ्याम्	पालकेभ्यः
	विनाशाय	विनाशाभ्याम्	विनाशेभ्यः
	विशालाय	विशालाभ्याम्	विशालेभ्यः

2. श्लोकान् सस्वरं गायत ।

लिखित:

1. श्लोकांशान् लिखत -

(क) प्रसादे यस्य ..... विपत्तिः ..... तथा ।

..... विशालाय ..... परमात्मने ॥

(ख) नमामि देवं .....

.....तत्कार्यजगत्स्वरूपम् ।

..... तद् वाचक-शब्दवृन्दम्

महेश्वरं ..... ॥

2. उत्तराणि लिखत -

(क) शिवस्य प्रसादात् किम् मिलति ?

(ख) कस्य कोपने विपत्तिः लभ्यते ?

(ग) जगत् कीदृश्यम् अस्ति ?

(घ) संसारस्य विनाशं कः करोति ?

(ङ) प्राणिनां पालनं कः करोति ?

3. सुमेलितं कुरुत -

(क)	(ख)
सुखम्	सम्पत्तिः
सत्यम्	ग्रहणम्
विपत्तिः	कोपनम्
जन्म	दुःखम्
प्रसादः	मिथ्या
दानम्	विनाशः

6. रिक्तस्थानानि पूरयत -

(क)	शिवाय ..... ।		नमः / नमामि
(ख)	..... नमः ।		गणेशं / गणेशाय
(ग)	..... नमः ।		सरस्वतीं / सरस्वत्यै
(घ)	जगदीशं ..... ।		नमामि / नमः
(ङ)	मातरं ..... ।		नमः / नमामि
(च)	..... स्मरामि ।		कृष्णं / कृष्णाय
(छ)	..... नमः ।		तस्मात् / तस्मै

7. सन्धिविच्छेदं कुरुत -

यथा - यद्यपि = यदि + अपि

नमस्तस्यै = ... + ...

धर्मात्मा = ... + ...

गच्छाम्यहम् = ... + ...

जगदीश्वरः = ... + ...

नमस्कारः = ... + ...

गणेशः = ... + ...

सदैव = ... + ...

8. वाक्यानि रचयत -

गच्छामि - .....

यूयम् - .....

विद्यालयात् - .....

देवम् - .....

वृक्षेषु - .....

9. पाठभिन्नं श्लोकमेकं स्वस्मरणेन लिखत ।

10. संस्कृते अनुवादं कुरुत -

(क) वह पिता को प्रणाम करता है ।

(ख) वे दोनों धन प्राप्त करते हैं ।

(ग) वे सब सत्य बोलते हैं ।

(घ) तुम वेद पढ़ते हो ।

(ङ) देवता को (देवाय) नमस्कार है ।

(च) तुम दोनों विद्यालय जाते हो ।

(छ) तुमलोग कार्य करते हो ।

योग्यता-विस्तारः

किसी कार्य का आरम्भ स्तुति, प्रार्थना या वन्दना से किया जाता है । इसमें यह भावना होती है कि हमारा कार्य अच्छी तरह चलेगा और बिना विघ्न-बाधा के पूरा हो जायेगा । इसीलिए पाठशालाओं में भी शिक्षणकार्य का आरम्भ प्रार्थना से होता है । प्रार्थना आस्तिकता का संकेत देती है कि हम किसी दिव्य-शक्ति में विश्वास करते हैं । संस्कृत के सभी ग्रन्थ मंगलाचरण के रूप में प्रार्थना से ही आरम्भ होते हैं ।

प्रार्थना अपने आराध्यदेव या सबके आराध्य परम प्रभु की की जाती है । सर्वधर्मसमभाव की दृष्टि से परमेश्वर या परम प्रभु की वन्दना सर्वत्र वाञ्छनीय है क्योंकि उनमें किसी प्रकार का पक्षपात या वैषम्य नहीं है । वे ही जगत् के सृष्टिकर्ता, पालक तथा संहारक भी हैं । जगत् की सारी व्यवस्था का संचालन उन्हीं से होता है । उनकी प्रसन्नता में समस्त प्राणियों का कल्याण

निहित है और उनका कोप संकट लाता है । कोई अपने कर्तव्य से च्युत होता है तो वह परमात्म का कोपभाजन बनता है । ईश्वर की वन्दना उनके प्रति कृतज्ञता का निवेदन है । भारतवर्ष में वेद उपनिषद्, पुराण तथा अन्य सभी ग्रन्थ ईश-वन्दना से भरे हैं । पुराणों में विविध देवों के रूप में भी परमेश्वर की स्तुति है । ऋग्वेद में कहा गया है - **एकं सद् विप्रा बहुधा वदन्ति** । अर्थात एक ही तत्त्व की स्तुति अनेक रूपों में होती है । हम जिस रूप में भी वन्दना कर रहे हों वह परमात्मा की ही वन्दना है -

सर्वदेवनमस्कारः केशवं प्रति गच्छति ।


*****

द्वितीयः पाठः

कूर्मशशककथा

(लङ्लकार)

[इस पाठ में एक कछुए और एक खरहे की कथा है। दोनों मित्र थे तथा एक वन में सरोवर के निकट रहते थे। उनमें एक अन्य सरोवर के पास पहुँचने की प्रतिस्पर्धा हुई। खरहा तो अपनी तेज गति के अहंकार में कुछ दूर चलकर आराम करने लगा किंतु कछुआ धीमी गति से निरन्तर चलता रहा। उसने प्रतिस्पर्धा जीत ली। इस पाठ से शिक्षा मिलती है कि नियमित रूप से परिश्रम किया जाय तो मंद बुद्धि वाला भी जीवन में बहुत आगे निकल सकता है।]



चम्पारण्ये सरोवरे एकः कूर्मः निवसति स्म। तस्य मित्रता शशकेन अभवत्। तौ सर्वदा एकत्र स्थित्वा नानाः कथाः कथयतः। परस्परम् आलापेन तयोः मित्रता दृढा जाता। एकदा तौ विचारं कृतवन्तौ यत् वनस्य उपान्ते गन्तव्यम्। आवयोः मध्ये कः तत्र प्रथमं गच्छेत् ? कूर्मः अकथयत् - अहमेव तत्र प्रथमं गमिष्यामि। शशकः अहसत् - त्वं तु शनैः-शनैः चलसि। कथं तत्र प्रथमं गमिष्यसि ? अहमेव तत्र प्रथमं प्राप्स्यामि।

कूर्मः नियमस्य पालकः सदा परिश्रमी च आसीत्। सः शनैः-शनैः किन्तु निरन्तरं चलितः। शशकः दीर्घकालं मार्गे विरम्य पुनः तीव्रया गत्या अचलत्। यदा स वनस्य उपान्तं

प्राप्तवान् तदा अपश्यत् यत् कूर्मः पूर्वमेव तत्र अवस्थितः अस्ति । शशकः लज्जितः जातः । सत्यमुक्तम् - **निरन्तरं श्रमेण असम्भवम् अपि कार्यं सम्भवति** । क्व कूर्मस्य मन्थरगतिः, क्व शशकस्य तीव्रगतिः । किन्तु कूर्मः निरन्तरं कार्येण विजयी अभवत् ।

शब्दार्थाः

अरण्ये	=	जंगल में
सरोवरे	=	तालाब में
कूर्मः	=	कछुआ
निवसति स्म	=	रहता था / रहती थी
शशकः	=	खरगोश, खरहा
अभवत्	=	हुआ
तौ	=	वे दोनों
स्थित्वा	=	रह कर
कथयतः	=	दोनों कहते हैं
परस्परम्	=	आपस में
आलापेन	=	बातचीत के द्वारा
जाता	=	हुई
एकदा	=	एक बार
कृतवन्तौ	=	किया (द्वि०व०)
यत्	=	कि
उपान्ते	=	(दूसरे) छोर / किनारे पर

गन्तव्यम्	=	जाना चाहिए
आवयोः	=	हमदोनों के
कः	=	कौन
तत्र	=	वहाँ
गच्छेत्	=	पहुँचे, जाए
अकथयत्	=	कहा
अहमेव (अहम्+एव)	=	मैं ही
अहसत्	=	हँसा
तु	=	तो
शनैः-शनैः	=	धीरे-धीरे
कथम्	=	कैसे
गमिष्यसि	=	जाओगे
प्राप्स्यामि	=	प्राप्त करूँगा, पहुँचूँगा
पालकः	=	पालन करने वाला
निरन्तरम्	=	लगातार
चलितः	=	चल पड़ा
अवस्थितः	=	रुका हुआ/पहुँचा हुआ
श्रमेण	=	परिश्रम से
सम्भवति	=	संभव होता है
मन्थरगतिः	=	धीमी चाल वाला
क्व	=	कहाँ
कार्येण	=	काम से

व्याकरणम्

सन्धि-विच्छेदः

चम्पारण्ये = चम्पा + अरण्ये (दीर्घसन्धिः)

उपान्ते = उप + अन्ते (दीर्घसन्धिः)

चासीत् = च + आसीत् (दीर्घसन्धिः)

प्रकृति-प्रत्यय-विभागः

स्थित्वा = $\sqrt{\text{स्था}}$ + क्त्वा

जातः = $\sqrt{\text{जन्}}$ + क्त

गन्तव्यम् = $\sqrt{\text{गम्}}$ + तव्यत्

विरम्य = वि + $\sqrt{\text{रम्}}$ + ल्यप्

अभवत् = $\sqrt{\text{भू}}$ लङ्लकारः, प्रथमपुरुषः, एकवचनम्

कथयतः = $\sqrt{\text{कथ्}}$ + लट्लकारः, प्रथमपुरुषः, द्विवचनम्

कृतवन्तौ = $\sqrt{\text{कृ}}$ + क्तवतु, द्विवचनम्

गच्छेत् = $\sqrt{\text{गम्}}$, विधिलिङ्, प्रथमपुरुषः, एकवचनम्

अकथयत् = $\sqrt{\text{कथ्}}$, लङ्लकारः, प्रथमपुरुषः, एकवचनम्

अभ्यास:

मौखिक:

1. निम्नलिखितानां पदानाम् अर्थं वदत -

अरण्ये, कूर्मः, शशकः, परस्परम्, मन्थरगतिः, दीर्घकालम्, शनैः-शनैः, निरन्तरम्, एकदा ।

2. इमानि पदानि पठत -

अभवत्	अभवताम्	अभवन्
अपठत्	अपठताम्	अपठन्
गच्छेत्	गच्छेताम्	गच्छेयुः
वदेत्	वदेताम्	वदेयुः

लिखित:

3. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकवाक्येन लिखत -

(क) कस्मिन् अरण्ये एकः कूर्मः निवसति स्म ?

(ख) शशकः कस्य मित्रम् आसीत् ?

(ग) परस्परम् आलापेन तयोः मित्रता कीदृशी जाता ?

(घ) कः विजयी अभवत् ?

(ङ) कः शनैः शनैः चलति ?

(च) तीव्रया गत्या कः चलति ?

(छ) कूर्मः कीदृशः आसीत् ?

4. मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत-

दृढा,	कूर्मः,	कार्यं,	परिश्रमी,	लज्जितः

(क) चम्पारण्ये सरोवरे एकः ..... निवसति स्म ।

(ख) परस्परम् आलापेन तयोः मित्रता ..... जाता ।

(ग) कूर्मः नियमस्य पालकः सदा ..... च आसीत् ।

(घ) शशकः ..... जातः ।

(ङ) निरन्तरं श्रमेण असम्भवम् अपि ..... सम्भवति ।

5. सुमेलनं कुरुत -

'अ'	'आ'
(क) शशकः	(i) मेहनत से
(ख) कूर्मः	(ii) बहुत समय तक
(ग) श्रमेण	(iii) तालाब
(घ) दीर्घकालम्	(iv) खरगोश
(ङ) अरण्ये	(v) कछुआ
(च) सरोवरः	(vi) जंगल में

6. निम्नलिखितानां पदानां बहुवचनं लिखत -

(क) गच्छति .....

(ख) करोति .....

(ग) पठति .....

(घ) पश्यामि .....

(ङ) गमिष्यामि .....

(च) चलसि .....

(छ) सम्भवति .....

7. क्त / क्त्वा प्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत -

(क) √भू + क्त = ...

(ख) √स्था + क्त्वा = ...

(ग) √पू + क्त = ...

(घ) √पद् + क्त = ...

(ङ) √हस् + क्त्वा = ...

(च) √गम् + क्त्वा = ...

8. संस्कृते अनुवादं कुरुत -

(क) मैं साइकिल से (द्विचक्रिकया) घर जाता हूँ।

(ख) हम दोनों धीरे-धीरे (शनैः शनैः) उद्यान में टहलते हैं। (अट् = टहलना)

(ग) हमलोग संस्कृत लिखते हैं।

(घ) खरगोश तेज दौड़ता है।

(ङ) कछुआ धीरे-धीरे चलता है।

(च) भारत में छह ऋतुएँ होती हैं।

(छ) वसन्त ऋतुओं का राजा है।

9. अधोलिखितानां पदानां प्रयोगेण वाक्यानि रचयत -

एकत्र, उपान्ते, तत्र, विरम्य, प्राप्स्यामि।

10. पदानि योजयित्वा लिखत -

(क) अहम् + एव = ...

(ख) असम्भवम् + अपि = ...

(ग) पूर्वम् + एव = ...

(घ) सत्यम् + उक्तम् = ...

(ङ) अहम् + अस्मि = ...

11. अधोलिखितवाक्येषु 'सत्यम्' 'असत्यम्' वा लिखत -

(क) सरोवरे शशकः निवसति । ( )

(ख) परस्परम् आलापेन तयोः मित्रता जाता । ( )

(ग) कूर्मः मार्गे विरम्य चलितः । ( )

(घ) शशकः तीव्रया गत्या अचलत् । ( )

(ङ) शशकः निरन्तरं श्रमेण विजयी अभवत् । ( )

योग्यता-विस्तारः

संस्कृत भाषा में पशु-पक्षियों की कथाएँ नीतिकथा (Fable) के रूप में प्राचीन भारत तथा पाश्चात्य देशों में भी प्रचलित थीं । इन मानवेतर प्राणियों को पात्र बनाकर नीतिकथाओं में मनुष्यों को उपदेश दिया जाता है । संस्कृत में पञ्चतन्त्र ऐसी कथाओं का बहुत बड़ा संकलन है । बच्चों के लिए ये कथाएँ मनोरंजन का तो साधन हैं ही, इनसे जीवन में काम देने वाले उपदेश भी मिलते हैं.। उपर्युक्त कथा में कूर्म निरन्तर परिश्रम करके सफल होता है जबकि शशक अपनी तीव्र गति पर अहंकार रखने तथा आलस्य के कारण सफल नहीं होता । छात्रों को भी इससे निरन्तर परिश्रम करने का उपदेश मिलता है । अत्यंत साधारण छात्र भी दृढ़ संकल्प करें और सही दिशा में निरन्तर परिश्रम करते रहें तो उनका लक्ष्य दूर नहीं रह सकता ।

*****

तृतीयः पाठः

ऋतुपरिचयः

(विशेष्य-विशेषण-सम्बन्ध)

[यद्यपि व्यवहार में शीतकाल, ग्रीष्मकाल तथा वर्षाकाल - ये तीन ही वर्ष में मुख्य ऋतुएँ हैं किंतु सूक्ष्म दृष्टि से विचार करने पर प्राचीन काल से भारत में छह ऋतुओं को मानने की परम्परा आ रही है। संसार में कहीं भी ये छह ऋतुएँ नहीं होती। भारत का प्राकृतिक सौन्दर्य इन छहों ऋतुओं का स्पष्ट भेद कर देता है। प्रस्तुत पाठ में इन ऋतुओं का संक्षिप्त परिचय दिया गया है।]



अस्माकं देशे षट् ऋतवः भवन्ति - वसन्तः, ग्रीष्मः, वर्षाः, शरद्, हेमन्तः, शिशिरं च। सन्ते सर्वेषु पादपेषु नवानि किसलयानि पुष्पाणि च भवन्ति। सर्वत्र शोभनः समयः नातिशीतः ातितापः भवति। कोकिलानां मधुरः स्वरः राजते। ग्रीष्मे सूर्यस्य तापः प्रखरः भवति। जलाशयाः ायेण जलशून्याः भवन्ति। सर्वे जीवाः छायाम् इच्छन्ति। विद्यालयेषु ग्रीष्मे अवकाशः भवति।

वर्षाकाले आकाशः मेघयुक्तः भवति। यदा-कदा वृष्टिरपि भवति। सम्पूर्णा पृथ्वी जलेन ाप्यति। कृषिः सर्वत्र शोभते। यदा अतिवृष्टिः भवति तदा नदीषु जलप्लावनं जायते। जनाः ाष्टम् अनुभवन्ति। मार्गाः अपि विच्छिन्नाः भवन्ति। शरत्काले पुनः शोभनः समयः आगच्छति। दीषु जलाशयेषु च जलं स्वच्छं भवति। अस्मिन् समये एव दुर्गापूजा, दीपावली च प्रसिद्धौ उत्सवौ क्तः।

हेमन्ते शीतस्य आरम्भः भवति । सूर्यस्य किरणाः रोचन्ते । धान्यं क्षेत्रेषु पक्वं भवति । कृषकाः तेन प्रसन्नाः भवन्ति । शिशिरे शीतस्य आधिक्यं भवति । सूर्यस्य किरणाः अपि यदा-कदा तुषारैः लुप्ताः भवन्ति । निर्धनाः जनाः शीतेन पीडाम् अनुभवन्ति । यत्र-तत्र अग्निः प्रज्वालितः सेवितश्च भवति । सर्वेषु ऋतुषु वसन्तः राजा कथ्यते ।

ग्रीष्मो वर्षाः शरच्चैव हेमन्तो शिशिरं तथा ।
तेषु सर्वेषु राजायं वसन्तो मोददायकः ॥

शब्दार्थाः

अस्माकम्	=	हमलोगों का / हमारा, हमारे
देशे	=	देश में
सर्वेषु	=	सब में
पादपेषु	=	पौधों / वृक्षों में
नवानि किसलयानि	=	नये पत्ते
पुष्पाणि	=	फूल (बहुवचन)
सर्वत्र	=	सभी जगह
नातिशीतः	=	न अधिक ठंढ
नातितापः	=	न अधिक गर्मी
कोकिलानाम्	=	कोयलों का
राजते	=	शोभता है
सूर्यस्य	=	सूर्य का

खरः	=	तेज
लाशयाः	=	जलाशय / तालाब
ायेण	=	प्रायः / बहुधा / लगभग
लशून्याः	=	जलरहित
ीवाः	=	जीव (बहुवचन)
ायाम्	=	छाया (को)
द्यालयेषु	=	विद्यालयों में
र्षाकाले	=	वर्षा के समय (में)
दा-कदा	=	कभी-कभी
प्यति	=	तृप्त होता है / संतुष्ट होता है
तिवृष्टिः	=	अधिक वर्षा
ा	=	तब
ीषु	=	नदियों में
ल्लावनम्	=	बाढ़
ायते	=	हो जाता है
नुभवन्ति	=	अनुभव करते हैं
च्छिन्नाः	=	टूट जाते हैं
रत्काले	=	शरद् ऋतु में
स्मिन्	=	इसमें

रोचन्ते	-	अच्छे लगते हैं । (बहुवचन)
धान्यम्	-	धान / अन्न
क्षेत्रेषु	=	खेतों में
पक्वम्	-	पका हुआ
कृषकाः	=	किसान (बहुवचन)
तेन	=	उससे
आधिक्यम्	=	अधिकता
तुषारैः	-	ओस के कणों से (बहुवचन)
पीडाम्	=	कष्ट (को)
सेवितः	=	सेवन किया गया
कथ्यते	-	कहा जाता है (कर्मवाच्य)
मोददायकः	-	आनन्द देने वाला

व्याकरणम्

संस्कृत में विशेष्य और विशेषण एक ही रूप के होते हैं । जो विभक्ति, लिङ्ग तथा वचन विशेष्य में होते हैं वे ही विशेषण में लगाये जाते हैं । इस पाठ में इन अभिव्यक्तियों को देखें-

सर्वेषु पादपेषु	सम्पूर्णा पृथ्वी
नवानि किसलयानि	मार्गाः विच्छिन्नाः
शोभनः समयः	जलं स्वच्छम्
मधुरः स्वरः	प्रसिद्धौ उत्सवौ

प्रखरः तापः — धान्यं पक्वम्

जलशून्याः जलाशयाः — किरणाः लुप्ताः

मेघयुक्तः आकाशः — निर्धनाः जनाः

वसन्तः मोददायकः

सन्धि-विच्छेदः

नाति = न + अति (दीर्घसन्धिः, स्वरसन्धिः)

वृष्टिरपि = वृष्टिः + अपि (विसर्गसन्धिः)

सेवितश्च = सेवितः + च (विसर्गसन्धिः)

शरच्चैव = शरत् + च + एव (व्यञ्जनसन्धिः, वृद्धिसन्धिः)

प्रकृति-प्रत्यय-विभागः

इच्छन्ति = $\sqrt{इष्}$, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

तृप्यति = $\sqrt{तृप्}$, लट्लकारः, प्रथमपुरुषः, एकवचनम्

अनुभवन्ति = अनु + $\sqrt{भू}$, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

रोचन्ते = $\sqrt{रुच्}$, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

जायते = $\sqrt{जन्}$, लट्लकारः, प्रथमपुरुषः, एकवचनम्

शोभते = $\sqrt{शुभ्}$, लट्लकारः, प्रथमपुरुषः, एकवचनम्

आगच्छति = आ + $\sqrt{गम्}$, लट्लकारः, प्रथमपुरुषः, एकवचनम्

कथ्यते = $\sqrt{कथ्}$ + यक् (कर्मवाच्यम्), लट्लकारः, प्रथमपुरुषः, एकवचनम्

विच्छिन्नाः = वि + $\sqrt{छिद्}$ + क्त, प्रथमपुरुषः, बहुवचनम्

अभ्यासः

मौखिकः

1. अधोलिखितानां पदानाम् उच्चारणं कुरुत -

अस्माकम्, इच्छन्ति, वृष्टिरपि, तृप्यति, जलप्लावनम्, शरत्काले, तुषारै प्रज्वालितः, सेवितश्च, ऋतुषु ।

2. अधोलिखितानां पदानाम् अर्थं वदत -

किसलयानि, पादपः, प्रायेण, विच्छिन्नाः, सर्वत्र, यदा-कदा, पक्वम्, तुषारैः, रोचन्ते ।

3. निम्नलिखितानां पदानां बहुवचनं वदत -

इच्छति, पठसि, गच्छामि, भवति, तृप्यति, आगच्छति, बालकः, फलम्

लिखितः

4. कोष्ठात् शब्दं चित्वा रिक्तस्थानानि पूरयत -

(क) अस्माकं देशे ..... ऋतवः भवन्ति । (पञ्च / षड्)

(ख) शिशिरे ..... आधिक्यं भवति । (तापस्य / शीतस्य)

(ग) सर्वेषु ऋतुषु राजा ..... भवति । (वसन्तः / ग्रीष्मः)

(घ) ..... स्वरः मधुरः भवति । (कोकिलस्य / काकस्य)

(ङ) हेमन्ते ..... आरम्भः भवति । (शीतस्य / तापस्य)

5. सुमेलनं कुरुत -

'अ'	'आ'
(क) कोकिलः	(i) जलप्लावनम्
(ख) वर्षाः	(ii) वसन्तः
(ग) ऋतुराजः	(iii) मधुरः स्वरः
(घ) षट्	(iv) प्रज्वालितः
(ङ) अग्निः	(v) ऋतवः

6. निम्नलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत -

(क) अस्माकं देशे कति ऋतवः भवन्ति ?

(ख) कदा सूर्यस्य तापः प्रखरः भवति ?

(ग) विद्यालयेषु अवकाशः कदा भवति ?

(घ) सम्पूर्णा पृथ्वी केन तृप्यति ?

(ङ) शीतस्य आरम्भः कदा भवति ?

7. उदाहरणानुसारं लिखत -

यथा - एकवचनम्	बहुवचनम्
भवति	भवन्ति
(क) आगच्छति	.....
(ख) इच्छति	.....
(ग) तृप्यति	.....
(घ) वदसि	.....
(ङ) ददामि	.....
(च) करोषि	.....
(छ) गच्छामि	.....
(ज) कथ्यते	.....

8. लिखत 'आम्' (हाँ) अथवा 'न' (नहीं)।

		उत्तरम्
यथा - अस्माकं देशे षट् ऋतवः भवन्ति	-	आम्।
(क) विद्यालयेषु हेमन्ते अवकाशः भवति	-	.....
(ख) वसन्ते शीतस्य आरम्भः भवति	-	.....

(ग) शिशिरे शीतस्य आरम्भः भवति - .....

(घ) ग्रीष्मे जलाशयाः प्रायेण जलपूर्णाः **भवन्ति** - .....

(ङ) **निर्धनाः जनाः शीतेन** पीडाम् अनुभवन्ति - .....

9. उदाहरणानुसारेण मध्यमपुरुषरूपाणि लिखत -

यथा - पठति - पठसि ।

(क) गच्छति - ..... ।

(ख) पठिष्यति - ..... ।

(ग) **कथयति** - ..... ।

(घ) **गच्छतः** - ..... ।

(ङ) **पठन्ति** - ..... ।

10. उदाहरणानुसारेण विभक्तिनिर्णयं कुरुत -

यथा - बालकेन - तृतीया विभक्तिः

(क) बालकाय - ..... ।

(ख) नदीनाम् - ..... ।

(ग) गृहेषु - ..... ।

(घ) वृक्षैः - ..... ।

(ङ) लतया - ..... ।

11. उदाहरणानुसारेण वचननिर्णयं कुरुत -

यथा - नद्यौ - द्विवचनम् ।

(क) **लताः** - .....

(ख) **लताभिः** - .....

(ग) बालकेषु - .....

(घ) भवनात् - .....

(ङ) पुरुषः - .....

योग्यता-विस्तार:

एक वर्ष में छह ऋतुएँ होती हैं । एक-एक ऋतु में दो मास माने जाते हैं । वसन्त ऋतु चैत्र और वैशाख मासों में होती है । इसका स्वागत चैत्र के प्रथम दिवस को वसन्तोत्सव मनाकर किया जाता है । ज्येष्ठ और आषाढ़ मास को ग्रीष्म कहते हैं । सूर्य का ताप इन मासों में बहुत अधिक रहता है । श्रावण तथा भाद्रपद (भादो) मासों को वर्षा ऋतु कहते हैं । इनमें खूब वृष्टि होती है । आश्विन और कार्तिक मास शरद् ऋतु के होते हैं । धान के पौधे इन मासों में फल से भर जाते हैं और पकने लगते हैं । अग्रहायण (अगहन, मार्गशीर्ष) तथा पौष मास हेमन्त ऋतु के हैं । इसमें शीत का प्रकोप बढ़ने लगता है । माघ और फाल्गुन को शिशिर ऋतु कहते हैं । इनमें ओस, कुहासा आदि की वृद्धि रहती है । इस प्रकार ऋतुओं का चक्र चलता है ।

संस्कृत के कवियों ने काव्यों में सभी ऋतुओं का वर्णन किया है । कालिदास का ऋतुसंहार काव्य ग्रीष्म से आरम्भ करके वसन्त तक का वर्णन देता है । इसमें छह सर्ग (खण्ड) हैं । कुल श्लोकों की संख्या 144 है ।

*****

चतुर्थः पाठः

स्वतन्त्रता-दिवसः

(लोट् तथा लृट्लकार)

[शताब्दियों की राजनीतिक दासता से मुक्त होकर हमारा देश 15 अगस्त 1947 के दिन स्वतंत्र हुआ। इस दिवस का महत्त्व भारतवर्ष के लिए बहुत अधिक है। यह एक राष्ट्रीय दिवस के रूप में अपने देश तथा विदेशों में भी मनाया जाता है। इस दिवस के महत्त्व पर प्रस्तुत पाठ में एक संक्षिप्त वार्तालाप है।]



कुन्तलः : मित्र ! त्वम् इदानीमपि न प्रस्तुतः ? कदा विद्यालयं चलिष्यसि ?

रहीमः : ननु, शीघ्रम् आगच्छामि। आवां सहैव विद्यालयं गमिष्यावः।

कुन्तलः : चल, चल शीघ्रम्। विद्यालये स्वतन्त्रतादिवसस्य भव्यः समारोहः अस्ति। तत्र ध्वजस्य उत्तोलनाय मन्त्री आगमिष्यति।

(उभौ गच्छतः)

रहीम : पश्य, पश्य कुन्तल ! अयं जोसफः आगच्छति। स विद्यालयं गन्तुं धावति। (जोसफं प्रति) मा मा मित्र ! मा धाव। वयं सहैव चलिष्यामः।

(सर्वे विद्यालयं प्राप्ताः)

शीला : स्वागतं, स्वागतम् । आगच्छत । ध्वजस्य उत्तोलनस्थले सर्वे आचार्याः प्रधानाचार्यश्च वर्तन्ते । मन्त्री महोदयः अपि शीघ्रमागमिष्यति। चलत। स्व-स्थाने अवस्थिताः भवत । (मन्त्री ध्वजोत्तोलनं करोति, ततः स्वतन्त्रतादिवसस्य महत्त्वं बोधयति ।)

मन्त्री : अस्य विद्यालयस्य मान्याः प्रधानाचार्याः, अन्ये प्रतिष्ठिताः आचार्याः, प्रियाः छात्राः ! नूनं स्वतन्त्रतादिवसस्य शुभः अवसरः प्रतिवर्षम् आयाति, अस्माकं देशस्य पूर्वपुरुषाणां बलिदानं बोधयति ।

अस्माकं देशस्य एकैकः जनः अद्य प्रमुदितः । अधुना वयं सर्वथा स्वतन्त्राः । किन्तु संयमः अस्माकं धनं वर्तते । शास्त्राणि कथयन्ति **"आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।"**

अतः तदेव कार्यं करणीयं येन सर्वे जनाः प्रमुदिताः भवन्तु न कस्यापि कुत्रापि कष्टं भवेत्। अत्र जीवनस्य समरसता अपेक्षिता । सर्वे समानाः सन्ति । न कुत्रापि विषमता भवेत् । धर्मः, जातिः, वर्गः, प्रान्तः, वेश-भूषा, आहारः कामं पृथक् भवेत् किन्तु सर्वे अस्यैव देशस्य स्वतन्त्राः नागरिकाः। अतः कथमपि विषमः व्यवहारः न करणीयः । तदैव स्वतन्त्रतायाः वास्तविकं महत्त्वं भविष्यति ।

जयतु भारतम्, जयन्तु भारतीयाः ।

(इति कथयित्वा मन्त्री महोदयः नमस्कारं करोति । मधुरान्नं गृहीत्वा सर्वे गृहं गच्छन्ति ।)

शब्दार्थः

इदानीमपि (इदानीम् + अपि) = इस समय भी, अबतक भी

ननु = ठीक है, अच्छी बात है

शीघ्रम् = जल्दी

आगच्छामि = आता/आती हूँ

सहैव (सह + एव) = साथ ही

गमिष्यावः	=	(हम दोनों) जाएँगे
चल	=	चलो
विद्यालये	=	विद्यालय में
भव्यः	=	बड़ा, अच्छा
ध्वजस्य	=	झण्डे के
उत्तोलनाय	=	उत्तोलन/फहराने के लिए
आगच्छति	=	आता/आती है
उभौ	=	दोनों
गच्छतः	=	(दोनों) जाते हैं
पश्य	=	देखो
गन्तुम्	=	जाने के लिए
धावति	=	दौड़ता/दौड़ती है
प्रति	=	की ओर
मा	=	मत/नहीं
धाव	=	दौड़ो
चलिष्यामः	=	(हमलोग) चलेंगे
आचार्याः (बहुवचन)	=	आचार्य/शिक्षक
प्रधानाचार्यश्च (प्रधान+आचार्यः+च)	=	और प्रधानाचार्य/हेडमास्टर
वर्तन्ते	=	हैं

शीघ्रमागमिष्यति (शीघ्रम्+आगमिष्यति) = जल्दी आएगा/आएगी

चलत = (तुमलोग) चलो

स्व = अपना/अपने

स्थाने = स्थान/जगह पर

अवस्थिता = खड़े, खड़ी

भवत = हो जाओ

करोति = करता/करती है

ततः = उसके बाद, वहाँ से

स्वतन्त्रतादिवसस्य = आजादी के दिन का/की

बोधयति = बतलाता/बतलाती है

अस्य = इसका

विद्यालयस्य = विद्यालय का/की

मान्याः = मान्यवर/गणमान्य लोग

अन्ये = दूसरे

प्रतिष्ठिताः = सम्मानित / आदरणीय

नूनम् = निश्चित रूप से

शुभः = पवित्र, शुभ, अच्छा

प्रतिवर्षम् = हर साल, प्रत्येक वर्ष

आयाति = आता / आती है

अस्माकम्	=	हमलोगों का
बलिदानम्	=	त्याग
एकैकः (एक+एकः)	=	एक-एक, हरेक
अद्य	=	आज
प्रमुदितः	=	प्रसन्न हुआ, बहुत खुश
अधुना	=	इस समय
सर्वथा	=	पूरी तरह से
शास्त्राणि	=	ग्रन्थों में, पुस्तकें
कथयन्ति	=	कहते / कहती हैं
आत्मनः	=	अपने / अपनी
प्रतिकूलानि	=	विपरीत / अच्छा न लगनेवाले
परेषाम्	=	दूसरों का / के लिए
समाचरेत् (सम्+आचरेत्)	=	आचरण / व्यवहार करना चाहिए
तदेव (तत्+एव)	=	वही
येन	=	जिससे
स्यन्तु	=	हों
कस्यापि (कस्य+अपि)	=	किसी का भी
कुत्रापि (कुत्र+अपि)	=	कहीं भी
अपेक्षिता	=	अपेक्षित / वाञ्छित हैं
विषमता	=	विभिन्नता / असमानता

भवेत्	=	हो
कामम्	=	भले ही
कथमपि (कथम्+अपि)	=	कैसे भी, किसी रूप में
करणीयः	=	करना चाहिए
तदैव (तदा+एव)	=	तभी
जयतु	=	(उसकी) जय हो
इति	=	ऐसा
कथयित्वा	=	कहकर
मधुरान्नम् (मधुर+अन्नम्)	=	मीठा अन्न, मिठाई
गृहीत्वा	=	लेकर, ग्रहण करके

व्याकरणम्

लोट्लकारः (Imperative Mood) :- संस्कृत में अनुज्ञा की दशा (Mood) बताने के लिए लोट्लकार का प्रयोग होता है जैसे - स पठतु = वह पढ़े । त्वं पठ = तुम पढ़ो । अहं पठानि = मैं पढ़ूँ। यूयं लिखत = तुम सब लिखो । बालकाः धावन्तु = लड़के दौड़ें । वयं वदेम = हम बोलें। इस पाठ में चल, पश्य, धाव, चलत, भवत, भवन्तु इत्यादि में लोट्लकार के प्रयोग हैं ।

लृट्लकारः (Future Tense) :- भविष्यत् काल का बोध कराने के लिए धातु से लृट्लकार का प्रयोग होता है । इसमें लट् जैसे ही रूप होते हैं, केवल धातु के बाद 'स्य' या 'इष्य' लगाया जाता है । जैसे - गमिष्यति, गमिष्यसि, गमिष्यामि । आगमिष्यसि, चलिष्यसि, पठिष्यामः इत्यादि। कुछ धातुओं के लृट् रूप हैं - वद् - वदिष्यति, दा-दास्यति, वस्- वत्स्यति, दृश्-द्रक्ष्यति, वह्-वक्ष्यति। प्रथमपुरुष एकवचन का रूप जान लेने से शेष रूप लट् के समान बना लें ।

सन्धि-विच्छेदः -

सहैव = सह + एव (वृद्धिसन्धिः)

प्रधानाचार्यश्च = प्रधान + आचार्यः + च (दीर्घसन्धिः, विसर्गसन्धिः)

ध्वजोत्तोलनम् = ध्वज + उत्तोलनम् (गुणसन्धिः)

एकैकः = एक + एकः (वृद्धिसन्धिः)

तदेव = तत् + एव (व्यञ्जनसन्धिः)

कस्यापि = कस्य + अपि (दीर्घसन्धिः)

कुत्रापि = कुत्र + अपि (दीर्घसन्धिः)

अस्यैव = अस्य + एव (वृद्धिसन्धिः)

तदैव = तदा + एव (वृद्धिसन्धिः)

प्रकृति-प्रत्यय-विभागः

आगच्छामि = आ+ √गम्, लट्लकारः, उत्तमपुरुषः, एकवचनम्

गमिष्यावः = √गम् , लृट्लकारः, उत्तमपुरुषः, द्विवचनम्

गन्तुम् = √गम् + तुमुन्

धावति = √धाव्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

चलिष्यामः = √चल् , लृट्लकारः, उत्तमपुरुषः, बहुवचनम्

वर्तन्ते = √वृत्, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

बोधयति = √बुध् + णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

आयाति = आ + √या, लट्लकारः, प्रथमपुरुषः, एकवचनम्

रमुदितः = प्र + √मुद् + क्त, पुल्लिङ्गम्, एकवचनम्

कथयन्ति = √कथ् + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

समाचरेत् = सम् + आ + √चर् , विधिलिङ्, प्रथमपुरुषः, एकवचनम्

करणीयम् = √कृ + अनीयर्, नपुंसकलिङ्गम्, एकवचनम्

स्वेत् = √भू , विधिलिङ्, प्रथमपुरुषः, एकवचनम्

त्वयतु = √धि , लोट्लकारः, प्रथमपुरुषः, एकवचनम्

कथयित्वा = √कथ् + क्त्वा

अभ्यासः

मौखिकः

- अधोलिखितानां पदानाम् उच्चारणं कुरुत -

इदानीमपि, प्रस्तुतः, गमिष्यावः, ध्वजस्य, उत्तोलनाय, चलिष्यामः, प्रधानाचार्यः, शीघ्रमागमिष्यति, प्रतिवर्षम्, पूर्वपुरुषाणाम् ।

- निम्नलिखितानां पदानाम् अर्थं वदत -

आवाम्, गमिष्यावः, उत्तोलनाय, उभौ, मा, बोधयति, प्रतिष्ठितः, अस्माकम्, अद्य, आत्मनः, प्रतिकूलानि, परेषाम्, समाचरेत्, अपेक्षितः, कथयित्वा, गृहीत्वा ।

- निम्नलिखितानां धातुरूपाणां पाठं कुरुत -

आगच्छति	आगच्छतः	आगच्छन्ति
आगच्छसि	आगच्छथः	आगच्छथ
आगच्छामि	आगच्छावः	आगच्छामः

4. स्वतन्त्रतादिवसस्य विषये हिन्दीभाषायां पञ्च वाक्यानि वदत ।

लिखितः

5. अधोलिखितानां प्रश्नानाम् उत्तरं पूर्णवाक्येन लिखत -

(क) स्वतन्त्रतादिवसः कदा आयोजितः ?

(ख) अस्मिन् पाठे कः प्रथमः वक्ता ?

(ग) ध्वजोत्तोलनाय कः आगच्छति ?

(घ) अस्माभिः कीदृशः व्यवहारः न करणीयः ?

(ङ) 'जयतु भारतम्, जयन्तु भारतीयाः' इति कथयित्वा मन्त्री महोदयः किं करोति ?

6. सुमेलनं कुरुत -

(क) स्वतन्त्रतादिवसः	-	(i)	वह
(ख) अहम्	-	(ii)	यह
(ग) आवाम्	-	(iii)	हमलोग
(घ) वयम्	-	(iv)	हमदोनों
(ङ) अयम्	-	(v)	मैं
(च) सः	-	(vi)	15 अगस्त 1947

7. कोष्ठात् पदं चित्वा रिक्तस्थानानि पूरयत -

(क) आवां सहैव विद्यालयं ..... । (गमिष्यामः / गमिष्यावः)

(ख) ध्वजस्य उत्तोलनाय ..... आगच्छति । (मन्त्री / प्रधानमन्त्री)

(ग) स्वतन्त्रतादिवसस्य शुभः अवसरः ..... आयाति । (प्रतिवर्षम् / प्रतिमासम्)

(घ) अधुना वयं सर्वथा ..... । (स्वतन्त्राः / परतन्त्राः)

(ङ) तदेव कार्यं करणीयं येन सर्वे जनाः ..... भवन्तु । (प्रमुदिताः / खिन्नाः)

अधोलिखितवाक्येषु 'सत्यम्' 'असत्यम्' वा लिखत -

(क) विद्यालये स्वतन्त्रतादिवसस्य भव्यः समारोहः अस्ति । .....

(ख) विद्यालये ध्वजस्य उत्तोलनाय मुख्यमन्त्री आगच्छति । .....

(ग) स्वतन्त्रतादिवसः अस्माकं देशस्य पूर्वपुरुषाणां बलिदानं बोधयति काम्

.....

(घ) अधुना वयं सर्वथा स्वतन्त्राः । .....

(ङ) "आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।" .....

शब्दान् दृष्ट्वा लिखत -

गमिष्यावः, शीघ्रम्, प्रधानाचार्यः, ध्वजोत्तोलनम्, महत्त्वम्, पूर्वपुरुषाणाम्, शास्त्राणि, प्रमुदिताः, अपेक्षिता, व्यवहारः, स्वतन्त्रतायाः, मधुरान्नम्

मन्त्री महोदय स्वतन्त्रता दिवस के विषय में जो कुछ कहते हैं उससे क्या शिक्षा मिलती है?

निम्नलिखितानां पदानां सन्धिं सन्धि-विच्छेदं वा कुरुत-

सहैव =

ध्वज + उत्तोलनम् =

प्रधानाचार्यः =

एक + एकः =

तदेव =

तदा + एव =

कुत्रापि =

कस्य + अपि =

योग्यता-विस्तार:

संसार में जितने भी राज्य पहले पराधीन रहे हैं उन्हें स्वाधीनता मिलने पर उनके निवासिय को बड़ी प्रसन्नता होती है। स्वतंत्रता प्राप्त करने पर वहाँ के निवासियों को ही अपने शासन व अधिकार मिल जाता है। राज्य के सारे संसाधन स्वतंत्र होकर राज्य के निवासियों के हित में लगा जाते हैं। इसलिए प्रत्येक राज्य के लिये स्वतन्त्रता दिवस का महत्त्व है। जिस दिन उसे स्वतंत्र मिली उसे प्रतिवर्ष समारोहपूर्वक वह राज्य मनाता है। इसलिए स्वतंत्रता दिवस का महत्त्व है भारतवर्ष में दो राष्ट्रीय पर्व मनाए जाते हैं।

1. 15 अगस्त 1947 ई० को भारत को ब्रिटिश राज्य से मुक्ति मिली। इस दिन भारत व राजधानी दिल्ली में लाल किले के ऊपर प्रधानमंत्री ध्वजोत्तोलन करते हैं तथा सरकार व गतिविधियों और उपलब्धियों पर व्याख्यान देते हैं। अन्य राज्यों में वहाँ के मुख्यमंत्री तथ शैक्षणिक संस्थाओं में कोई गणमान्य व्यक्ति झण्डा फहराते हैं और स्वाधीनता का महत्त बतलाते हैं।

2. 26 जनवरी 1950 ई० को भारत का संविधान लागू हुआ था। अत: प्रतिवर्ष इस दिन व गणतन्त्र दिवस के रूप में आयोजित किया जाता है। राजधानी दिल्ली में इस दिन भार के राष्ट्रपति राष्ट्रध्वज की वन्दना करते हैं तथा तीनों सेनाओं (स्थल, जल, वायु) की परे की सलामी लेते हैं। इसके अतिरिक्त देश के विभिन्न राज्यों की झाँकियाँ भी निकाल जाती हैं। इसी प्रकार विभिन्न राज्यों की राजधानियों में वहाँ के राज्यपाल इसी प्रकार प परेड की सलामी लेते हैं तथा विभिन्न राजकीय विभागों की झाँकियाँ भी प्रदर्शित व जाती हैं। ये दोनों हमारे आदरणीय राष्ट्रीय पर्व हैं। प्रत्येक नागरिक को इनका सम्मा करना चाहिए तथा राष्ट्रीय ध्वज के प्रति आदर और श्रद्धा रखनी चाहिए।

स्वतन्त्रता पर हिन्दी-चलचित्र

भारतीय स्वतन्त्रता के विभिन्न पक्षों को मनोरंजक और रोमांचक रूप से प्रस्तुत करने वाले चलचित्र इस अवसर पर दूरदर्शन से प्रसारित किये जाते हैं। विद्यालयों में भी ऐसे चलचित्र दिखाये जाते हैं। फिल्म-निर्माताओं ने बड़े परिश्रम से अनेक फिल्मों का निर्माण समय-समय पर किया है। उन्हें भारतीय सिनेमा-प्रेमियों से प्रशंसा भी मिली है। कुछ फिल्में इस प्रकार हैं - जागृति, शहीद, नया दौर, उपकार, गांधी, क्रान्ति, द लीजेंड ऑफ भगत सिंह इत्यादि। इनमें से कुछ फिल्मों को छात्रों ने देखा होगा। अपने स्मरण से देखी हुई फिल्म का कथानक छात्र लिख सकते हैं। उसके गुण-दोष पर वे अपने विचार प्रकट करें।

*****

राष्ट्रीय तंबाकू नियंत्रण कार्यक्रम

i) सभी तंबाकू उत्पाद हानिकारक हैं।
ii) कोई भी तंबाकू उत्पाद किसी भी मात्रा में सुरक्षित नहीं है।
iii) बीड़ी उतनी ही हानिकारक है जितनी की सिगरेट।
iv) सेकेंड हैंड धूम्रपान भी जानलेवा होता है।
v) तंबाकू चबाने से मुँह के कैंसर सहित कई रोग हो सकते हैं।


पञ्चमः पाठः

प्रहेलिकाः

(सन्धि)

[सभी भाषाओं में बौद्धिक विकास के लिए पहेलियों की परम्परा रही है। संस्कृत में भी अनेक पहेलियाँ प्राचीन काल से प्रचलित रही हैं और आज भी जोड़ी जा रही हैं। इनसे श्रोताओं का बौद्धिक व्यायाम होता है। पत्र-पत्रिकाओं में भी नई-नई पहेलियाँ दी जाती हैं। प्रस्तुत पाठ में ऐसी पाँच पहेलियाँ पद्य-बद्ध रूप में दी गयी हैं जिनसे पाठकों का मनोरंजन होगा।]





अपदो दूरगामी च
साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च
यो जानाति स पण्डितः ॥1॥

न तस्यादिः न तस्यान्तः
मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति
यदि जानासि तद् वद ॥2॥

नान्नं फलं वा खादामि
न पिबामि जलं क्वचित् ।
चलामि दिवसे रात्रौ
समयं बोधयामि च ।।3।।
मुखं कृष्णं वपुः क्षीणं
मञ्जूषायां च संवृतम् ।
घर्षणं मे दहत्याशु
रसवत्यां वसाम्यहम् ।।4।।
तिष्ठामि पादेन बको न पङ्गुः
दाता फलानां न कृतिर्न यत्नः ।
मौनेन जीवामि मुनिर्न मूकः
सेव्योऽस्मि कोऽहं नृपतिर्न देवः ।।5।।

शब्दार्थाः

अपदः	=	बिना पैर वाला
दूरगामी	=	दूर जाने वाला
पण्डितः	=	विद्वान्
साक्षरः	=	अक्षरयुक्त, पढ़ा हुआ
अमुखः	=	बिना मुख वाला
स्फुटवक्ता	=	स्पष्ट बोलने वाला
यः	=	जो
जानाति	=	जानता है
तस्यादिः (तस्य+आदिः)	=	उसका आरंभ
तस्यान्तः (तस्य+अन्तः)	=	उसका अंत

मध्ये	=	बीच में
ममाप्यस्ति (मम+अपि+अस्ति)	=	मुझे भी है
तवाप्यस्ति	=	तुम्हें भी है
वद	=	कहो, बोलो
नान्नम् (न+अन्नम्)	=	अन्न नहीं
क्वचित्	=	कहीं
चलामि	=	चलता हूँ
दिवसे	=	दिन में
रात्रौ	=	रात में
बोधयामि	=	बतलाता हूँ
कृष्णम्	=	काला
वपुः	=	शरीर
क्षीणम्	=	दुबला-पतला
मञ्जूषायाम्	=	पेटिका में, पेटी में
संवृतम्	=	ढँका हुआ, बंद
घर्षणम्	=	रगड़ना
दहत्याशु (दहति+आशु)	=	शीघ्र जलता है
आशु	=	शीघ्र
रसवत्याम् (रसवती, सप्तमी)	=	रसोई में
वसाम्यहम् (वसामि+अहम्)	=	रहता / रहती हूँ
तिष्ठामि	=	ठहरता / ठहरती हूँ
पादेन	=	एक पैर से

बकः	=	बगुला
पङ्गुः	=	लँगड़ा
दाता	=	दानी
फलानाम्	=	फलों का
कृतिः	=	कर्म
यत्नः	=	परिश्रम
मौनेन	=	चुप रहने से
जीवामि	=	जीता / जीती हूँ
मूकः	=	गूँगा
सेव्योऽस्मि (सेव्यः+अस्मि)	=	सेवन करने योग्य हूँ
कोऽहम् (कः+अहम्)	=	मैं कौन हूँ
नृपतिः	=	राजा
देवः	=	देवता

(प्रहेलिका-संङ्केताः - पत्रपुटम्, नयनम्, घटिका, अग्निशलाका, वृक्षः)

व्याकरणम्

सन्धि-विच्छेदः

तस्यादिः	=	तस्य + आदिः (दीर्घसन्धिः)
तस्यान्तः	=	तस्य + अन्तः (दीर्घसन्धिः)

ममाप्यस्ति	=	मम + अपि + अस्ति (दीर्घ, यण्सन्धिः)
तवाप्यस्ति	=	तव + अपि + अस्ति (दीर्घ, यण्सन्धिः)
नान्नम्	=	न + अन्नम् (दीर्घसन्धिः)
दहत्याशु	=	दहति + आशु (यण्सन्धिः)
कृतिर्न	=	कृतिः + न (विसर्गसन्धिः)
मुनिर्न	=	मुनिः + न (विसर्गसन्धिः)
सेव्योऽस्मि	=	सेव्यः + अस्मि (विसर्गसन्धिः)
कोऽहम्	=	कः + अहम् (विसर्गसन्धिः)
नृपतिर्न	=	नृपतिः + न (विसर्गसन्धिः)

प्रकृति-प्रत्यय-विभागः

जानाति	=	√ज्ञा , लट्लकारः, प्रथमपुरुषः, एकवचनम्
तिष्ठति	=	√स्था , लट्लकारः, प्रथमपुरुषः, एकवचनम्
खादामि	=	√खाद् , लट्लकारः, उत्तमपुरुषः, एकवचनम्
पिबामि	=	√पा , लट्लकारः, उत्तमपुरुषः, एकवचनम्
चलामि	=	√चल् , लट्लकारः, उत्तमपुरुषः, एकवचनम्
बोधयामि	=	√बुध् + णिच्, लट्लकारः, उत्तमपुरुषः, एकवचनम्
संवृतम्	=	सम् + √वृ + क्त, नपुंसकलिङ्गम्, एकवचनम्
दहति	=	√दह् , लट्लकारः, प्रथमपुरुषः, एकवचनम्
जीवामि	=	√जीव् , लट्लकारः, उत्तमपुरुषः, एकवचनम्
वसामि	=	√वस् , लट्लकारः, उत्तमपुरुषः, एकवचनम्

अभ्यासः

मौखिकः

1. अधोलिखितानां पदानाम् उच्चारणं कुरुत -

अपदः, स्फुटवक्ता, तस्यादिः, तस्यान्तः, यस्तस्य, ममाप्यस्ति, तवाप्यस्ति, सेव्योऽस्मि, कोऽहम्, नृपतिर्न, मञ्जूषायाम् ।

2. निम्नलिखितानां पदानाम् अर्थं वदत -

अपदः, तस्यादिः, ममाप्यस्ति, मूकः, कृष्णम्, घर्षणम्, मञ्जूषायाम्, दहेत्याशु, रसवत्याम् ।

3. स्वमातृभाषायाम् एकां प्रहेलिकां वदत ।

4. निम्नलिखितानां धातु-रूपाणां पाठं कुरुत -

पुरुषः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अस्ति	स्तः	सन्ति
मध्यमपुरुषः	असि	स्थः	स्थ
उत्तमपुरुषः	अस्मि	स्वः	स्मः

लिखितः

5. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत -

(क) वयं काभ्यां पश्यामः ?

(ख) का भोजनं न करोति ?

(ग) कस्य आदौ अन्ते च 'न' भवति ?

(घ) मुखेन विना कः वदति ?

(ङ) पत्रवाहकः किं वितरति ?

(च) का फलं न खादति ?

(छ) घर्षणेन का दहति ?

6. मञ्जूषायाः उचितपदानि चित्वा वाक्यानि पूरयत -

अन्तः, जीवामि, पादेन, पिबामि, कृष्णम्, समयं, पण्डितः

(क) साक्षरो न च ..... ।

(ख) न तस्यादिः न तस्य ..... ।

(ग) तिष्ठामि ..... बको न पङ्गुः ।

(घ) मौनेन ..... मुनिर्न पुङ्गु ।

(ङ) न .....जलं क्वचित् ।

(च) चलामि दिवसे रात्रौ ..... बोधयामि ।

(छ) मुखं ..... वपुः क्षीणम् ।

7. विपरीतार्थकशब्दयोः सुमेलनं कुरुत -

अ		आ
(क) इतः	-	(i) न
(ख) उपरि	-	(ii) अन्तः
(ग) आम्	-	(iii) ततः
(घ) आदिः	-	(iv) अधः
(ङ) मम	-	(v) यदा-कदा
(च) निरन्तरम्	-	(vi) तव

8. उदाहरणानुसारं रिक्तस्थानं पूरयत -

उत्तमपुरुषः		मध्यमपुरुषः
यथा - वदामि	-	वदसि
(i) जानामि	-	.....
(ii) पिबामि	-	.....
(iii)	-	वससि
(iv)	-	बोधयसि
(v) खादामि	-	.....

9. उदाहरणानुसारेण वचनपरिवर्तनं कुरुत –

	एकवचनम्		द्विवचनम्
यथा–	खादति	=	खादतः
(क)	चलामि	=	.....
(ख)	लिखसि	=	.....
(ग)	पठिष्यति	=	.....
(घ)	अस्ति	=	.....
(ङ)	दहति	=	.....
(च)	वसामि	=	.....
(छ)	तिष्ठसि	=	.....

10. वाक्यनिर्माणं कुरुत –

देवः, वृक्षः, नयनम्, पत्रम्, चलामि, पठसि, खादति, फलम् ।

11. पूरयत किं 'सत्यम्' 'असत्यम्' वा, लिखत –

यथा–	वृक्षः फलं ददाति –	सत्यम्
(क)	मत्स्याः तडागे निवसन्ति	.....
(ख)	शिवः त्रिनेत्रधारी कथ्यते	.....
(ग)	बकाः मत्स्यान् न खादन्ति	.....
(घ)	घटिका समयं बोधयति	.....
(ङ)	अग्निशलाका घर्षणेन दहति	.....

12. अधोलिखितानां पदानां सन्धिविच्छेदं कुरुत –

दहत्याशु, कोऽयम्, नृपतिर्न, सेव्योऽस्मि, तस्यान्तः, तवाप्यस्ति ।

13. संस्कृते अनुवादं कुरुत –

(क) कुन्तल विद्यालय कब (कदा) जाएगा ?

(ख) शीला और रहीम कब आएँगे ?

(ग) वे लोग मिठाई खाएँगे ।

(घ) मैं विद्यालय जाऊँगा ।

(ङ) गर्मी में नदियाँ सूख जाएँगी ।

(च) अब (इदानीम्) तुम क्या करोगे ?

(छ) हमलोग राजगीर जाएँगे ।

योग्यता-विस्तारः

संसार की सभी भाषाओं में बौद्धिक व्यायाम के लिए पहेलियाँ बहुत दिनों से प्रचलित हैं। एक पीढ़ी से दूसरी पीढ़ी में ये पहेलियाँ चलती जाती हैं । इन्हें मनोरंजन का भी एक साधन बनाया गया है । भारतीय भाषाओं में सबसे प्राचीन संस्कृत में पद्यात्मक पहेलियों की बहुत बड़ी संख्या मिलती है । इनका उत्तर खोजने में श्रोताओं को बहुत अधिक माथा-पच्ची करनी पड़ती है, किन्तु बौद्धिक विकास के लिए ये आवश्यक हैं । यहाँ कुछ अतिरिक्त पहेलियाँ दी जाती हैं-

1. सुप्तोऽपि नेत्रे न निमीलयामि
   जलस्य मध्ये निवसामि नित्यम् ।
   स्वजातिजीवा मम भोजनानि
   वदन्तु मान्याः ! मम नामधेयम् ॥

अर्थात् सोते हुए भी मैं अपनी आँखें नहीं बंद करता । मैं सदा जल में रहता हूँ । अपनी जाति के जीवों को ही खाता हूँ । क्या आप मेरा नाम बताएँगे ? (मैं मत्स्य अर्थात् मछली हूँ।)

2. वृक्षाग्रवासी न च पक्षिराजः
   त्रिनेत्रधारी न च शूलपाणिः ।
   त्वग्वस्त्रधारी न च सिद्धयोगी
   जलं च बिभ्रन् घटो न मेघः ॥

अर्थात् वृक्ष के ऊपर रहता हूँ किन्तु पक्षिराज (गरुड़) नहीं हूँ । मेरी तीन आँखें हैं किन्तु शिव नहीं हूँ । छाल का वस्त्र मेरे ऊपर है किन्तु मैं सिद्ध योगी नहीं हूँ । जल धारण करते हुए भी न मैं घड़ा हूँ न मेघ । (सोचिए मैं कौन हूँ ? मैं नारियल का फल हूँ ।)

3. एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः ।
   क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः ॥

अर्थात् इसकी एक आँख है किन्तु कौआ नहीं है । सदा बिल (छेद) में जाना चाहता है किन्तु साँप नहीं है । सदा घटता-बढ़ता है किन्तु न समुद्र है न चन्द्रमा । (बताएँ यह क्या है? यह कपड़ा सिलने वाली सूई है ।)

*****

षष्ठः पाठः

संख्याज्ञानम्

(संख्याज्ञान और पुष्प-परिचय)

स्तुत पाठ में संस्कृत भाषा में 21 से 50 तक की संख्याओं की अभिव्यक्ति को प्रयोग दिखाया गया है। क्य प्रायः प्रकीर्ण हैं । इससे इन संख्याओं के प्रयोग की प्रवृत्ति विद्यार्थियों में उत्पन्न होगी।]



अस्मिन् वर्गे पञ्चाशत् छात्राः सन्ति । एतेषु एकविंशतिः बालिकाः सन्ति । ततः नवविंशतिः ऊनत्रिंशत्) बालकाः वर्तन्ते । विद्यालयस्य उद्याने चत्वारिंशत् पाटलपादपाः, पञ्चत्रिंशत् यूथिकाः, ञ्चचत्वारिंशत् मल्लिकाः, त्रिंशत् कर्णिकाराः, द्वाविंशतिः जपाः सन्ति । शरत्काले उद्यानस्य ञ्चविंशतिः अपि शेफालिकाः पुष्पाणि धारयन्ति । तानि पुष्पाणि प्रातःकाले भूम्यां विकीर्णानि वन्ति । सरोवरे कमलपुष्पाणि सन्ति । अद्य चतुर्विंशतिः पुष्पाणि विकसितानि । अस्माकं देशे म्प्रति अष्टाविंशतिः राज्यानि सन्ति । आकाशे सप्तविंशतिः नक्षत्राणि सन्ति । जैनाः कथयन्ति यत् हावीरवर्धमानात् पूर्वं त्रयोविंशतिः तीर्थंकराः अभवन् । पार्श्वनाथः त्रयोविंशतितमः तीर्थंकरः भवत् । तेन पारसनाथपर्वतस्य प्रसिद्धिः ।

अस्माकं मुखे द्वात्रिंशत् दन्ताः भवन्ति । एकस्मिन् मासे सामान्यतः त्रिंशत् दिवसाः वन्ति । किन्तु जनवरी-मार्च-मई-जुलाई-अगस्त-अक्टूबर-दिसम्बर-मासेषु एकत्रिंशत् दिवसाः वन्ति । फरवरीमासे अष्टाविंशतिः दिवसाः सन्ति किन्तु चतुर्थे वर्षे ते ऊनत्रिंशत् भवन्ति । मम

लेखनपुस्तिकायां चत्वारिंशत् पत्राणि सन्ति । अस्मिन् पुस्तके अष्टचत्वारिंशत् पृष्ठाः सन्ति । मम गणितपुस्तिकायां षट्चत्वारिंशत् एव पत्राणि सन्ति । मम ग्रामे त्रयस्त्रिंशत् गृहाणि सन्ति । तव ग्रामे द्वाचत्वारिंशत् कूपाः सन्ति ।

शब्दार्थाः

अस्मिन्	=	इसमें
पञ्चाशत्	=	पचास
एकविंशतिः	=	इक्कीस
नवविंशतिः	=	उनतीस
उद्याने	=	बगीचे में
चत्वारिंशत्	=	चालीस
पाटलपादपाः	=	गुलाब के पौधे
पञ्चत्रिंशत्	=	पैंतीस
यूथिका	=	जूही
पञ्चचत्वारिंशत्	=	पैंतालीस
मल्लिकाः	=	बेला
त्रिंशत्	=	तीस
कर्णिकाराः	=	कनेर
द्वाविंशतिः	=	बाईस
जपाः	=	अड़हुल के फूल/वृक्ष
पञ्चविंशतिः	=	पचीस
शेफालिकाः	=	हरसिंगार
धारयन्ति	=	धारण करती हैं

तानि	=	वे (नपुं॰)
प्रातःकाले	=	सुबह में
भूमौ	=	पृथ्वी पर
विकीर्णानि	=	बिखरे हुए
सरोवरे	=	तालाब में
पुष्पाणि	=	फूल
चतुर्विंशतिः	=	चौबीस
विकसितानि	=	विकसित / खिले हुए
अस्माकम्	=	हमारे
सम्प्रति	=	इस समय / आजकल
अष्टाविंशतिः	=	अट्ठाईस
यत्	=	कि
पूर्वम्	=	पहले
त्रयोविंशतिः	=	तेईस
तीर्थंकराः (बहुवचन)	=	**जैनधर्म** के प्रसिद्ध संत
अभवन्	=	हुए
द्वात्रिंशत्	=	बत्तीस
दन्ताः	=	दाँत
सप्तविंशतिः	=	सत्ताईस
एकस्मिन् मासे	=	एक महीने में
दिवसाः	=	दिन
एकत्रिंशत्	=	इकतीस

चतुर्थे वर्षे	=	चौथे साल में
ऊनत्रिंशत्	=	उनतीस
अष्टचत्वारिंशत्	=	अड़तालीस
लेखनपुस्तिकायाम्	=	कॉपी में
चत्वारिंशत्	=	चालीस
पत्राणि	=	पन्ने
मम	=	मेरे
षट्चत्वारिंशत्	=	छियालीस
एव	=	ही
त्रयस्त्रिंशत्	=	तैंतीस
गृहाणि	=	घर (बहुवचन)
तव	=	तुम्हारे
द्वाचत्वारिंशत्	=	बयालीस
कूपाः	=	कुएँ

व्याकरणम्

प्रकृति-प्रत्यय-विभागः

अभवन्	=	√भू , लङ्लकारः, प्रथमपुरुषः, बहुवचनम्
कथयन्ति	=	√कथ् , लट्लकारः, प्रथमपुरुषः, बहुवचनम्
भवन्ति	=	√भू , लट्लकारः, प्रथमपुरुषः, बहुवचनम्
धारयन्ति	=	√धृ , लट्लकारः, प्रथमपुरुषः, बहुवचनम्
सन्ति	=	√अस् , लट्लकारः, प्रथमपुरुषः, बहुवचनम्

अभ्यासः

मौखिकः

निम्नलिखितानां पदानाम् उच्चारणं कुरुत -

पञ्चाशत्, एकचत्वारिंशत्, त्रिंशत्, विंशतिः, ऊनत्रिंशत्, चत्वारिंशत्, पञ्चविंशतिः, षट्त्रिंशत्, पञ्चपञ्चाशत्, चतुर्विंशतिः, अष्टाविंशतिः, त्रयस्त्रिंशत्

एकविंशतेः पञ्चाशत् यावत् संख्याः वदत ।

लिखितः

निम्नलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत -

(क) एकस्मिन् वर्षे कति मासाः भवन्ति ?

(ख) अस्माकं देशे सम्प्रति कति राज्यानि सन्ति ?

(ग) जनवरी-मासे कियन्तः दिवसाः भवन्ति ?

(घ) कः त्रयोविंशतितमः तीर्थंकरः अभवत् ?

(ङ) अस्माकं मुखे कियन्तः दन्ताः भवन्ति ?

एकविंशतेः आरभ्य त्रिंशत् यावत् संख्याः लिखत ।

एकत्रिंशतः आरभ्य चत्वारिंशत् यावत् संख्याः लिखत ।

एकचत्वारिंशतः आरभ्य पञ्चाशत् यावत् संख्याः लिखत ।

अधोलिखितान् अङ्कान् शब्देषु (अक्षरेषु) लिखत -

23, 27, 35, 46, 50, 38, 32, 25, 39, 31

पदमञ्जूषायाः पदं चित्वा रिक्तस्थानानि पूरयत -

एकत्रिंशत्, दिवसाः, अष्टाविंशतिः, सप्तविंशतिः, छात्राः

(क) आकाशे ..... नक्षत्राणि सन्ति ।

(ख) अस्माकं देशे ..... राज्यानि सन्ति ।

(ग) मार्चमासे ..... दिवसाः भवन्ति ।

(घ) अस्माकं वर्गे चत्वारिंशत् ..... सन्ति ।

(ङ) एकस्मिन् मासे त्रिंशत् ..... भवन्ति ।

9. **वचन-परिवर्तनं कुरुत -**

	एकवचनम्	बहुवचनम्
यथा-	वदति	वदन्ति
(क)	भवति	.....
(ख)	कथयति	.....
(ग)	पठसि	.....
(घ)	गच्छामि	.....
(ङ)	अस्ति	.....
(च)	असि	.....
(छ)	धारयति	.....
(ज)	विकसति	.....

10. **एतेषु किं सत्यम् असत्यम् वा, लिखत -**

यथा- अस्माकं मुखे पञ्चाशत् दन्ताः सन्ति । - असत्यम्

(क) अगस्तमासे एकत्रिंशत् दिवसाः भवन्ति । - .....

(ख) आकाशे चतुर्विंशतिः नक्षत्राणि सन्ति । - .....

(ग) जुलाई-मासे त्रिंशत् दिवसाः भवन्ति । - .....

(घ) फरवरी-मासे त्रिंशत् दिवसाः भवन्ति । - .....

(ङ) पार्श्वनाथः त्रयोविंशतितमः तीर्थंकरः आसीत् । - .....

11. सुमेलनं कुरुत -

अ		आ
(क) पुष्पाणि	-	(i) पृष्ठाः
(ख) तीर्थंकरः	-	(ii) नक्षत्राणि
(ग) मुखे	-	(iii) दन्ताः
(घ) आकाशे	-	(iv) पार्श्वनाथः
(ङ) पुस्तके	-	(v) विकसन्ति

12. अधोलिखितानां संख्यानाम् आरोहक्रमं लिखत -

द्वाविंशतिः, एकविंशतिः, पञ्चविंशतिः, चतुर्विंशतिः, सप्तविंशतिः, त्रयोविंशतिः, अष्टाविंशतिः, त्रिंशत्, नवविंशतिः, षड्विंशतिः

13. निम्नलिखितानां संख्यानाम् अवरोहक्रमं लिखत -

एकत्रिंशत्, त्रयस्त्रिंशत्, द्वात्रिंशत्, पञ्चत्रिंशत्, षट्त्रिंशत्, ऊनचत्वारिंशत्, चत्वारिंशत्, द्वाचत्वारिंशत्, चतुश्चत्वारिंशत्, त्रयश्चत्वारिंशत्, षट्चत्वारिंशत्, ऊनपञ्चाशत्, पञ्चाशत् ।

योग्यता-विस्तारः

इक्कीस से पचास तक की संख्याओं का क्रम यहाँ दिया जाता है । इसे विद्यार्थी स्मरण कर लें ।

एकविंशतिः	(21)	द्वाविंशतिः	(22)
त्रयोविंशतिः	(23)	चतुर्विंशतिः	(24)
पञ्चविंशतिः	(25)	षड्विंशतिः	(26)
सप्तविंशतिः	(27)	अष्टाविंशतिः	(28)
नवविंशतिः / ऊनत्रिंशत्	(29)	त्रिंशत्	(30)

एकत्रिंशत्	(31)	द्वात्रिंशत्	(32)
त्रयस्त्रिंशत्	(33)	चतुस्त्रिंशत्	(34)
पञ्चत्रिंशत्	(35)	षट्त्रिंशत्	(36)
सप्तत्रिंशत्	(37)	अष्टत्रिंशत्	(38)
नवत्रिंशत् / ऊनचत्वारिंशत्	(39)	चत्वारिंशत्	(40)
एकचत्वारिंशत्	(41)	द्वाचत्वारिंशत्	(42)
त्रयश्चत्वारिंशत्	(43)	चतुश्चत्वारिंशत्	(44)
पञ्चचत्वारिंशत्	(45)	षट्चत्वारिंशत्	(46)
सप्तचत्वारिंशत्	(47)	अष्टचत्वारिंशत्	(48)
नवचत्वारिंशत् / ऊनपञ्चाशत्	(49)	पञ्चाशत्	(50)

2. इन्हीं शब्दों से भारत की भाषाओं में संख्या-शब्द बने हैं जैसे -

एकविंशतिः	-	इक्कीस
द्वाविंशतिः	-	बाईस
एकत्रिंशत्	-	इकतीस
पञ्चत्रिंशत्	-	पैंतीस
षट्त्रिंशत्	-	छत्तीस इत्यादि ।

*****

सप्तमः पाठः

दीपोत्सवः

(सप्तमी विभक्ति का प्रयोग)

[प्रस्तुत पाठ में प्रसिद्ध भारतीय उत्सव दीपावली का वर्णन है। इसकी प्राचीन परम्परा वर्षाकाल में उत्पन्न दूषित तत्त्वों के विनाश तथा हर्षोल्लास प्रकट करने के उद्देश्य की पूर्ति करती थी। आज आनन्द का प्रकाश तो है किन्तु दीपकों के स्वरूप बदलने तथा पटाखा आदि के अनियन्त्रित प्रयोग से वायुमंडल दूषित हो जाता है। अतः इसके मनाने का स्वरूप बदलना चाहिए।]



अस्माकं समारोहेषु दीपोत्सवः विशिष्टः। दीपोत्सवः सामान्यतः दीपावली दिवाली वा नाम्ना ज्ञायते। प्रकाशोत्सवः अयं बालानां चित्तानि हरति। गृहेषु, हट्टेषु, चत्वरेषु, आपणेषु सर्वत्र दीपानां मालाः शोभन्ते।

कार्तिकमासस्य अमावस्यायां तिथौ प्रतिवर्षं भारतीया इमम् उत्सवं समायोजयन्ति। शारदीयः अयम् उत्सवः। वर्षायाम् ऋतौ सर्वत्र वर्षाणां प्रभावेण अस्वच्छता, कीटपतंगानां प्रसारश्च भवति। यदा शरद् आयाति तदा जनाः स्वगृहं परिसरं च स्वच्छं कुर्वन्ति। ते गृहाणि सुधया लिम्पन्ति। कपाटगवाक्षादीन् रञ्जयन्ति। इतस्ततः क्षिप्तम् अपद्रव्यम् अपसारयन्ति। सर्वत्र निर्मलता निवसति।

नवं वस्त्रं मिष्टान्नं च लब्ध्वा बाला मुदिताः भ्रमन्ति । ते पटाखाविस्फोटं **कृत्वा आनन्दमनुभवन्ति। जनाः** परस्परं शुभकामनां प्रकटयन्ति । सर्वत्र बन्धुभावः विराजते ।

रावणवधानन्तरं रामचन्द्रस्य अयोध्यागमने प्रथमः दीपोत्सवः आयोजितः इति जनश्रुतिः । तदा प्रभृति वयम् अस्य आयोजनं कुर्मः ।अस्मिन् पर्वणि जनाः रात्रौ स्व-स्वगृहं दीपमालिकया अलङ्कुर्वन्ति । धनस्य देवीं लक्ष्मीं पूजयन्ति । निर्धनतां निस्सारयन्ति । इयं रात्रिः सुखरात्रिः इति नाम्ना विख्याता । मिथिलायां बंगप्रदेशे च केचन देवीं कालिकां पूजयन्ति ।

वर्षाकाले वृद्धिम् उपगतानां कीटपतङ्गानां पुरा तैलवर्तिकाभिः विनाशो **भवति स्म** । तेन पर्यावरणं शुद्धं भवति स्म । अद्य तु वयं मोमवर्तिकानां विद्युद्दीपानां च प्रयोगं कुर्मः । **उल्लासप्रकटनायं** पटाखाविस्फोटः **च भवति । अनेन** वातावरणे **दूषितः पदार्थः वर्धते । कीटा न नश्यन्ति । वातावरणं** च **विषयुक्तं भवति । ध्वनिप्रदूषणं** चापि **वर्धते । अतः** सावधानेन भवितव्यम् । स्वरक्षणाय पर्यावरणरक्षणं **परमं कर्तव्यम् ।**

शब्दार्थः

नाम्ना	=	नाम से
ज्ञायते	=	जाना जाता है
विपणिषु	=	बाजारों में
चत्वरेषु	=	चौराहों पर, चबूतरों पर
आपणेषु	=	दुकानों में
शारदीयः	=	शरत्कालीन
कीटपंतगानाम्	=	कीड़ों-फतिंगों का
सुधया (सुधा + तृतीया)	=	चूने से
